# Shri Dharmapuri Ramalingeshvara Suprabhatam

# શ્રીધર્મપુરી રામલિઙ્ગેશ્વર સુપ્રભાતમ્

## Document Information

Text title : Dharmapuri Ramalingeshvara Suprabhatam

File name : dharmapurIrAmaliNgeshvarasuprabhAtam.itx

Category : shiva, koriDevishvanAthasharmA, suprabhAta, prapatti

Location : doc_shiva

Author : koriDe vishvanAthasharmA, dharmapurI

Transliterated by : koriDe vishvanAthasharmA

Proofread by : koriDe vishvanAthasharmA

Description/comments : Includes second suprabhAtam and prapatti

Acknowledge-Permission: Koride Vishwanatha Sharma

Latest update : March 15, 2018

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 2, 2021

*sanskritdocuments.org*

# શ્રીધર્મપુરી રામલિઙ્ગેશ્વર સુપ્રભાતમ્

સુપ્રભાતંસ્તોત્રમ્ પ્રપત્તી ચ

શ્રીમદ્ધર્મપુરીનાથરામચન્દ્રપ્રતિષ્ઠિત ।
ઉત્તિષ્ઠરામલિઙ્ગેશ રક્ષિતવ્યં જગત્રયમ્ ॥ ૧॥

ઉત્તિષ્ઠોત્તિષ્ઠગૌરીશ ઉત્તિષ્ઠ વૃષવાહન ।
ઉત્તિષ્ઠજગદધાર ઉદયાદ્રિં ગતો રવિઃ ॥ ૨॥

ઐશાન્યકોણગતમન્દિરગોગણેશ
ભક્તૈર્ભવાન્ પ્રથમતઃ ખલુ વન્દનીયઃ ।
દન્તૈકઘાતવિનિપાતિતદુષ્ટદૈત્ય
શ્રીરામલિઙ્ગસુત તે નનુ સુપ્રભાતમ્ ॥ ૩॥

દાક્ષયણીતિપ્રથમં ધૃતનામધેયે
શ્રીપાર્વતીતિ તદનુ પ્રથિતે હ્યપર્ણે ।
વિશ્વેશ્વરીતિપતિદત્તતદર્ધદેહે
શ્રીરામલિઙ્ગદયિતે તવ સુપ્રભાતમ્ ॥ ૪॥

દેવાધિદેવફણિભૂષણ નીલકણ્ઠ
શમ્ભોમહેશ  શશિભૂષણ વેદવેદ્ય ।
રક્ષ્યાઃસદા સકલલોક જનાંસ્ત્વમેવ
શ્રીરામલિઙ્ગભગવન્ તવ સુપ્રભાતમ્ ॥ ૫॥

પિત્રાજ્ઞયાવનગતેન સભાર્યકેણ
રામેણધર્મનિરતેન હિ ધર્મપુર્યામ્ ।
ત્વંગૌતમી ??કતયા કૃતલિઙ્ગરૂપઃ
શ્રીરામલિઙ્ગભગવન્ તવ સુપ્રભાતમ્ ॥ ૬॥

એકાદશૈશ્ચલઘુરુદ્રમહાતિરુદ્રૈઃ
રુદ્રાનુવાકચમકાદિક વેદઘોષૈઃ ।

આયાન્તિવિપ્રવિબુધાશ્ચ તવાર્ચનાય
શ્રીરામલિઙ્ગભગવન્ તવ સુપ્રભાતમ્ ॥ ૭॥

ગોદાવરીસુજલપૂર્ણઘટાન્ગૃહીત્વા
ભક્તાલલાટસમલંકૃતભસ્મરેખાઃ ।
દ્વારેઽત્રસન્તિ ભવતો હ્યભિષેચનાર્થં
શ્રીરામલિઙ્ગભગવન્ તવ સુપ્રભાતમ્ ॥ ૮॥

બ્રાહ્મીમુહૂર્તમનુગમ્યવિહઙ્ગમાસ્તુ
અશ્વત્થવૃક્ષમધિરુહ્યજનાન્ સ્વરાવૈઃ ।
તેચૈવ દર્શનફલં નનુ બોધયન્તિ
શ્રીરામલિઙ્ગભગવન્ તવ સુપ્રભાતમ્ ॥ ૯॥

તિથ્યાદિકંશુકમુખાત્ પઠતીહ જીવઃ
તેનારદઃ પિકમુખાત્ કુરુતેઽત્ર ગાનમ્ ।
ભૃઙ્ગીચ નૃત્યતિ મુદાઽત્ર મયૂરરૂપઃ
શ્રીરામલિઙ્ગભગવન્ તવ સુપ્રભાતમ્ ॥ ૧૦॥

ચન્દ્રાર્કનેત્ર ભવતઃ ખલુ સેવનાય
ચન્દ્રોઽભવચ્ચશિરસ્તવ ભૂષણં હિ ।
પાદૌહિ રઞ્જયતિ તે સ્વકરૈ સ્ત્વિહાર્કઃ
શ્રીરામલિઙ્ગભગવન્ તવ સુપ્રભાતમ્ ॥ ૧૧॥

યત્ત્વન્બરંતવ તનુત્વમુપેત્ય ભક્ત્યા
ભક્તપ્રકીર્તિતભવત્ સ્તુતિગીતિરાવમ્ ।
તુષ્યત્તનોતિચ દિશાઃ શ્રુતિઘોષરૂપં
શ્રીરામલિઙ્ગભગવન્ તવ સુપ્રભાતમ્ ॥ ૧૨॥

યસ્ત્વચ્છરીરપદવીંગમિતોઽનલોઽસૌ
ત્વન્મન્દિરંસ્વકિરણૈસ્તુ પ્રકાશયંશ્ચ ।
ત્વાંસેવતેઽત્ર ખલુ નિશ્ચલદીપરૂપઃ
શ્રીરામલિઙ્ગભગવન્ તવ સુપ્રભાતમ્ ॥ ૧૩॥

યોમારુતસ્તવ તનુત્વમુપેત્ય ભક્તઃ
ત્વાંસેવિતું ત્વિહ હિપૂરિતવેણુ યષ્ટિઃ ।
શમ્ભોકરોતિ તવ કીર્તિમયં સ ગાનં
શ્રીરામલિઙ્ગભગવન્ તવ સુપ્રભાતમ્ ॥ ૧૪॥

યાગૌતમેન કૃતગોહતિપાપનાશા
ગોદાવરીતવ જટોદ્ભવવાહિની ચ ।
ત્વાંસેવિતું પુરમિમાં તુ ગતાહિ સૈષા
શ્રીરામલિઙ્ગભગવન્ તવ સુપ્રભાતમ્ ॥ ૧૫॥

વારાણસીપુરપતેસ્તવદર્શનાર્થમ્
વિશ્વશ્વરેતિતપતઃ ખલુ ભક્તવૃન્દાન્ ।
સંરક્ષિતુંત્વિહ સમુદ્ભવલિઙ્ગરૂપઃ
શ્રીરામલિઙ્ગભગવન્ તવ સુપ્રભાતમ્ ॥ ૧૬॥

માત્રાસ્વરક્ષણકૃતે હ્યવારિતો યઃ
વિઘ્નાન્ધકારવિનિવારકભાનુરેષઃ।
તેદર્શનાર્થમગજાસુત ઈક્ષતેઽત્ર
શ્રીરામલિઙ્ગભગવન્ તવ સુપ્રભાતમ્ ॥ ૧૭॥

તેજોહિ યત્તવ નિપાતિતમગ્નિમૂર્તૌ
સ્કન્દસ્તદેવવિનિઘાતિતતારકોઽભૂત્ ।
ષાણ્માતુરઃસ ભવતેઽત્ર નિરીક્ષતે હિ
શ્રીરામલિઙ્ગભગવન્ તવ સુપ્રભાતમ્ ॥ ૧૮॥

યાત્વાજ્ઞયૈવ ખલુ તે મહિષાસુરાખ્યં
સિંહસ્થિતાહ્યગમયત્ યમરાજસદ્મ ।
દુર્ગામુદાઽત્ર તવ દર્શનલોલુપૈષા
શ્રીરામલિઙ્ગભગવન્ તવ સુપ્રભાતમ્ ॥ ૧૯॥

ત્વત્તુલ્યપુત્રમભિકામયિતાશિલાદઃ
યત્ત્વત્પ્રસાદમધિગમ્યસ યં હ્યવાપ ।
ત્વદ્દર્શનાયસ તુ તે પુરતોઽસ્તિ નન્દી
શ્રીરામલિઙ્ગભગવન્ તવ સુપ્રભાતમ્ ॥ ૨૦॥

યશ્ચામ્બુધેસ્તુમથને કૃતવાન્ સહાયં
યોવાસુકી ચ ગળભૂષણતાં ગતસ્તે ।
સોઽયંફણી તવ સુદર્શનલોલુપોઽત્ર
શ્રીરામલિઙ્ગભગવન્ તવ સુપ્રભાતમ્ ॥ ૨૧॥

યદ્વિશ્વનાથકૃતશઙ્કર સુપ્રભાતં

પ્રાતસ્તુયે નિલયમેત્ય પઠન્તિ ભક્ત્યા ।
તેરામલિઙ્ગસદનુગ્રપાત્રભૂતાઃ
આજીવનંહિ સદભીષ્ટફલં લભન્તે ॥ ૨૨॥

ઇતિ સુપ્રભાતં સમાપ્તમ્ ।

અથશ્રી ધર્મપુરી શ્રીરામલિઙ્ગેશ્વરસુપ્રભાતાણ્તર્ગતં સ્તોત્રમ્ ।

ધનુષીકૃતમેરુગિરીન્દ્રવિભો
વરચાપગુણીકૃતનાગપતે।
સ્વશરીકૃતવિષ્ણુહતત્રિપુર
જયરામપ્રતિષ્ઠિતલિઙ્ગ શિવ ॥ ૧॥

શિશુચન્દ્રવિભૂષિતમૌળિતટ
ઘનસર્પલસદ્ભુજદણ્ડવિભો।
ગિરિજાપ્રગતસ્વકવામતનો
જયરામપ્રતિષ્ઠિતલિઙ્ગ શિવ ॥ ૨॥

નિજભક્તવચઃપરિતુષ્ટ હર
નિજશૂલવિભીતયમાદિતતે।
નિજપાદપવિત્રિતગોત્રમણે
જયરામપ્રતિષ્ઠિતલિઙ્ગ શિવ ॥ ૩॥

મદમત્તગજાજિનવસ્ત્રધર
સ્થિરબદ્ધજટા ભૃતદેવનદે ।
ધૃતકાન્તવપુઃપરમાત્મવિભો
જયરામપ્રતિષ્ઠિતલિઙ્ગ શિવ ॥ ૪॥

ત્રિપુરાન્તકચાન્ધકરાક્ષસહન્
પ્રળાયાન્તકભીતકૃતાન્ત વિભો ।
વરતાણ્ડવનન્દિતભક્તતતે
જયરામપ્રતિષ્ઠિતલિઙ્ગ શિવ ॥ ૫॥

શિપિવિષ્ટદિગમ્બર શૂલકર
શશિશેખરનાગવિભૂષતનો ।
અવતાજ્જગતીંનિજભક્તયુતાં
જયરામપ્રતિષ્ઠિતલિઙ્ગ શિવ ॥ ૬॥

નનુધર્મપથં સ્વયમાચરિતું
ધૃતરામવપુર્હરિણાપ્રણુતઃ ।
શિવકેશવયોર્ન હિ ભેદ ઇતિ
જયરામપ્રતિષ્ઠિતલિઙ્ગ શિવ ॥ ૭॥

મનસાવચસા વપુષા સતતં
કરણૈશ્ચત્રિભિસ્તવ નામ જપન્ ।
ભવતોહિ નરો નિલયં લભતે
જયરામપ્રતિષ્ઠિતલિઙ્ગ શિવ ॥ ૮॥

કૃતયાઽર્ચનયાહૃતપાપચયાઃ
જિતયોગિહૃદસ્તવભક્ત વરાઃ ।
પટવોનિલયાધિગમે હર તે
જયરામપ્રતિષ્ઠિતલિઙ્ગ શિવ ॥ ૯॥

ભવભસ્મ વિલેપિતદેહધરઃ
શતરુદ્રવિધાનક પૂજયિતા ।
સચ તુષ્ટિકરસ્તવ ભક્તવરો
જયરામપ્રતિષ્ઠિતલિઙ્ગ શિવ ॥ ૧૦॥

હરિપાદસમુદ્ભવદેવનદી
નિજનાથગૃહાધિગમેઽભિરતા ।
ભુવનત્રયંખલુ પાવયિતું
હરતે નિલયં ગમિતા સા ॥ ૧૧॥

ભવમૂઢમતિં તવ ભક્તમમું
હરપશ્ય સદા દયયા વરદ ।
નિજભક્તમનોરથસિદ્ધિકર
જયરામપ્રતિષ્ઠિતલિઙ્ગ શિવ ॥ ૧૨॥

ઇતિ સ્તોત્રં સમ્પૂર્ણમ્ ।

અથશ્રી ધર્મપુરી શ્રીરામલિઙ્ગેશ્વરસુપ્રભાતાણ્તર્ગતા પ્રપત્તિઃ ।

યોબ્રહ્માદિ સમસ્ત દેવવિનુતો લિઙ્ગાત્મકસ્યાત્મજઃ
યંલબ્ધ્વા હિ મુદાન્વિતા સુતનયં ગૌરી જગન્માતૃકા ।
યસ્યેષ્ટાનુગુણંસમસ્તવિપદો દૂરીકૃતા ભક્તગાઃ

વન્દેતં વરરામલિઙ્ગતનયં  શ્રીવિઘ્નનાથં સદા ॥ ૧॥

અયિકરિકર્ણિકમૂષિકવાહન પર્વતજાસુત સામ્બપ્રિય
નુતજનપોષકષણ્મુખસેવિત  શઙ્કરચુમ્બિતફાલતટ ।
વરચતુરાનનદેવગણાર્ચિતદાનવભઞ્જક દાસરત
જયગણનાયક વિઘ્નવિનાશક ધર્મપુરીજનપાલ વિભો ॥ ૨॥

યૈષાદુષ્ટનિવારણે સુનિરતા ભક્તાર્તિનિર્હારિણી
યસ્યાસ્ત્વિષ્ટતયાહિ લબ્ધવિભવા નિષ્કિઞ્ચનાઃ પ્રાણિનઃ ।
મૂઢાન્જ્ઞાનવતઃ કરોતિ સતતં યા સ્વપ્રસાદાન્મુદા
વન્દેધર્મપુરીસ્થિતાં ભગવતીં તાં રામલિઙ્ગેશ્વરીમ્ ॥ ૩॥

હરનિજમૂર્ધજપાશજટોદ્ભવગૌતમજાસિકતોદ્ભવ ભોઃ
વરરઘુવંશકળાનિધિકીર્તિતરાઘવસેવિતલિઙ્ગતનો।
નિજવરભક્તકૃતાઘવિનાશકદાસજનાર્થિતદાનરતે
જયરજનીકરભૂષિતશેખર ધર્મપુરીવિલસન્નિલય ॥ ૪॥

ધ્યાનેલીનયતીન્દ્રવૃન્દહૃદયં સમ્મોદયંશ્ચૈકતઃ
વામાઙ્ગસ્થિતપાર્વતીમપિનિજાં સંલાલયંશ્ચાન્યતઃ ।
સ્વર્લોકાદ્ભુવનત્રયં જિગમિષું ગઙ્ગાં તથા ધારયન્
યોભક્તાન્ ખલુ રક્ષતીહ વરદસ્તં રામલિઙ્ગં ભજે ॥ ૫॥

ભસ્મોદ્ધૂલિતવિગ્રહોઽપિસતતં ભક્તેભ્ય ઐશ્વર્યદઃ
નામ્નારુદ્રકમૂર્તિરપ્યવિરતં શાન્તસ્વભાવશ્ચ યઃ ।
દારાયત્તશરીરકોઽપિનિયતૈઃ સંસ્તૂયતે ઽહર્નિશં
વન્દેધર્મપુરી સ્થિતં ભવહરં ત્વાં રામલિઙ્ગેશ્વર ॥ ૬॥

યાગઙ્ગા ચતુરાનનસ્ય કલશાત્ શ્રીવિષ્ણુપાદં ગતા
યાલોકત્રયપાવનાય ભવતો મૂર્ધ્નિ સ્થિતા પાવની ।
સૈષાતે હ્યભિષેચનાય ગમિતા ગોદવરીત્વં ત્વિહ
વન્દેધર્મપુરી સ્થિતં ત્વઘહરં ત્વાં રામલિઙ્ગેશ્વર ॥ ૭॥

બ્રહ્માદિદેવમકુટાગ્રમણિપ્રદીપ્તૌ
યાભ્યાંહિ પાવિત તનુર્ હિમવાન્ નિતાન્તમ્ ।
યૌરાવણસ્ય ભુકદર્પવિનાશહેતૂ
તૌરામલિઙ્ગ ચરણૌ શરણં પ્રપદ્યે ॥ ૮॥

વેદાન્તિભિઃશિવ ભવાન્ પ્રણતો હિ બ્રહ્મ
યઃસાઙ્ખ્યાકૈ સ્તુ પુરુષઃ પ્રકૃતેર્ વિભિન્નઃ ।
વિષ્ણુર્વિરિઞ્ચિરિતિ નૈકબુધૈ સ્ત્વમેકઃ
ત્વાંરામલિઙ્ગ શુભદં શરણં પ્રપદ્યે ॥ ૯॥

યોરાજન્નસુલોચનઃ ફણિધરઃ રામારમઃ શઙ્કરઃ ।
પ્રાર્થીરાજ્યપ્રસાદદઃશશિધરઃ યો વિશ્વનાથો જયઃ ।
યોઽસૌહૈમવતી સુકાન્તવરદઃ ભાગીરથી શેખરઃ
વન્દેત્વાં નટરાજ રામવરદં હીન્દૂત્તમાઙ્ગાદ્રિક ॥ ૧૦॥

બ્રહ્માત્વમેવ જગતઃ ખલુ સૃષ્ટિ કાર્યે
વિષ્ણુસ્ત્વમેવ નનુ સૂદ્ધરણે ચ તસ્ય ।
રુદ્રસ્ત્વમેવવિલયી કરણે ચ તસ્ય
ત્વાંરામલિઙ્ગ શુભદં શરણં પ્રપદ્યે ॥ ૧૧॥

ભૂમ્યાદયોહિ ભવતસ્તનવોઽષ્ટમૂર્તે
નિસ્સ્વાર્થતાંપ્રકટયન્તિ ન કેવલં તુ ।
તેચૈવ લોકસુહિતાય ભવન્તિ નૂનં
ત્વાંરામલિઙ્ગ શુભદં શરણં પ્રપદ્યે ॥ ૧૨॥

હેપાર્વતીશ વરદ ત્વયિ ભક્તિશૂન્યઃ
વેદાન્તશાસ્ત્રનિખિલાગમપણ્ડિતોયઃ ।
તજ્જીવનંગિરિશ તસ્ય નિરર્થકં સ્યાત્
ત્વાંરામલિઙ્ગ શુભદં શરણં પ્રપદ્યે ॥ ૧૩॥

ગાણાધિપત્યમધિગન્તુમહોનુ દન્તી
યત્તેપ્રદક્ષિણવિધિં કૃતવાન્ સુભક્તઃ ।
તેભક્તિશૂન્યમિતરત્તુ નિરર્થકં તત્
ત્વાંરામલિઙ્ગ શુભદં શરણં પ્રપદ્યે ॥ ૧૪॥

મારઃશરીકૃત સુ પુષ્પનિપાતનેન
ત્વત્ક્રોધજન્યનિટલેક્ષણવહ્નિદગ્ધઃ ।
મત્તસ્યભક્તિરહિતસ્ય ફલં નુચૈતત્
ત્વાંરામલિઙ્ગ શુભદં શરણં પ્રપદ્યે ॥ ૧૫॥

નાદિંહ્યજો તવ સમૈક્ષત લિઙ્ગમૂર્તેઃ
નાન્તંચ વિષ્ણુરપિ તે શિવ મૂર્તિમત્ત્વમ્ ।

વેત્તુંતુ કૈસ્તવ વિલાસમહો નુ સાધ્યં
ત્વાંરામલિઙ્ગ શુભદં શરણં પ્રપદ્યે ॥ ૧૬॥

રામોહિ ધર્મનિરતો ભવતશ્ચ ભક્તઃ
ભક્તસ્ત્વધર્મનિરતસ્ત્વથરાવણોઽપિ ।
ધર્મોઽભવદ્ધિવિજયી ભવતઃ પ્રસાદાત્
ત્વાંરામલિઙ્ગ શુભદં શરણં પ્રપદ્યે ॥ ૧૭॥

કૈરાતકેનવપુષા સુપરીક્ષતઃ સન્
પ્રાપાર્જુનોહિ તવ પાશુપતં કૃપાળો ।
યેનારિનિશનવિધાવભવત્સમર્થઃ
ત્વાંરામલિઙ્ગ શુભદં શરણં પ્રપદ્યે ॥ ૧૮॥

રામસ્તુશત્રુમવધીચ્ચ તવાર્ચનેન
કૃષ્ણઃપ્રિયસુતમવાપ તવાર્ચનેન
વિષ્ણુઃસુદર્શનમવાપ તવાર્ચનેન
ત્વાંરામલિઙ્ગ શુભદં શરણં પ્રપદ્યે ॥ ૧૯॥

સમ્પ્રાપ્યમૃત્યુસમયં તુ મૃકણ્ડુસૂનુઃ
ત્યક્તોયમેન ભવતો નુ દયાં સ લબ્ધ્વા ।
ભક્તાર્તિનાશનવિધૌત્વમહો નિબદ્ધઃ
ત્વાંરામલિઙ્ગ શુભદં શરણં પ્રપદ્યે ॥ ૨૦॥

દુગ્ધામ્બુધેઃસુમથિતાત્તુ સુરાસુરૈશ્ચ
તસ્માદ્ધિજાતગરળં ભવતા નિપીય ।
હેનીલકણ્ઠ જગતો વિહિતા સુરક્ષા
ત્વાંરામલિઙ્ગ શુભદં શરણં પ્રપદ્યે ॥ ૨૧॥

યઃસ્ત્રી મિષાદ્ધરિરમોહયદઙ્ગ ભોસ્ત્વાં
પ્રાસૂતસૈષ ભુવનારિવિનાશપુત્રમ્ ।
સર્વાઃક્રિયાસ્તવ હિ લોકહિતા ભવન્તિ
ત્વાંરામલિઙ્ગ શુભદં શરણં પ્રપદ્યે ॥ ૨૨॥

બાલ્યાત્ત્વમેવશિવ મે નનુ ચાત્મબન્ધુઃ
નત્વાં વિના મમ સખા હુદયઙ્ગતો યઃ ।
ત્વય્યેવદત્તહૃદયસ્તુ કરોમિ સર્વં
ત્વાંરામલિઙ્ગ શુભદં શરણં પ્રપદ્યે ॥ ૨૩॥

હેરામલિઙ્ગ ભગવન્ તવ સેવનેષુ
કિંવા કૃતં ત્વયિ મયા ત્વ વિચિન્ત્ય દોષમ્ ।
યસ્માત્તવસ્મૃતિ પથાદ્ધિ વિસૃષ્ટ એષઃ
તત્પ્રાપ્તુમીશ કરવાણિ કિમદ્ય હૃદ્યમ્ ॥ ૨૪॥

યાચેત્વહં ન હિ ધનં નનુ નીલકણ્ઠ
કીર્તિંચ નૈવ ન તુ વિસ્તૃત સાર્વભૌમમ્ ।
યાચેતુ કેવલમહં ભવતઃ કૃપાં તાં
યાંચિન્તયામિ ભુવનાધિપતેરનૂનામ્ ॥ ૨૫॥

શ્રીરામલિઙ્ગ ભગવાન્ વરપાઠકેભ્યો
નિત્યંત્વભીષ્ટ શુભ સૌખ્ય ફલં દદાતુ ।
લક્ષ્મીઃસમાવિશતુ ભક્તગૃહાણિ ભદ્રા
સર્વત્રચાસ્તુ વિજયઃ સકલસ્તુ તેષામ્ ॥ ૨૬॥

॥ ઇતિ સંસ્કૃતસાહિત્યરત્નબિરુદાઙ્ચિતસ્ય બુધકોટિનુતસ્ય
પ્રથિતકવિપણ્ડિતગણાગ્રણીવરસ્યાખિલશિષ્યકોટિવૃન્દાર્ચિત-
પાદપદ્મયુગળસ્યાચાર્યકોરિડેરાજન્નશાસ્ત્રિણઃ દ્વિતીયપુત્રેણ
કોરિડેવિશ્વનાથ શર્મણા વિરચિતા શ્રીધર્મપુરીરામલિઙ્ગેશ્વર
પ્રપત્તિઃસમાપ્તા ॥

Composedby Koride Vishwanatha Sharma, Dharmapuri, Telangana
Proofread by Koride Vishwanatha Sharma.

*Shri Dharmapuri Ramalingeshvara Suprabhatam*
pdf was typeset on December 2, 2021

Please send corrections to *sanskrit@cheerful.com*